श्रीराम

# श्री गुरुपादुकापंचकम्

ॐ नमो गुरुभ्यो गुरुपादुाभ्यो नमः परेभ्यः परपादुकाभ्यः
आचार्यसिध्धेश्वरपादुकाभ्यो नमो नमः श्री गुरुपादुकाभ्यः

ऐंकारह्रींकाररहस्ययुकत श्रीकारगूढार्थमहाविभूत्या
ॐ कारमर्मप्रतिपादिनीभ्यां नमो नमः श्री गुरुपादुकाभ्याम्

होत्राग्निहौत्राग्निहविष्यहोतृ होमादिसर्वाकृतिभासमानम्
यद् ब्रहम तद्बोधवितारिणीभ्यां नमो नमः श्री गुरुपादुकाभ्याम्

कामादिसर्पव्रजगारुडाभ्यां विवेकवैराग्यनिधिप्रदाभ्यां
बोधप्रदाभ्यां स्रुतमोक्षदाभ्यां नमो नमः श्री गुरुपादुकाभ्याम्

अनंतसंसारसमुद्रतार नौकायिताभ्यां स्थिरभकितदाभ्यां
जाडयाब्धिसंशोषणवाडवाभ्यां नमो नमः श्री गुरुपादुकाभ्याम्

ॐ शांतिः शांतिः शांतिः